# शरीरेन्द्रियसत्त्वात्मसंयोग एवायुः

**(म.म. राष्ट्रपति-सम्मानितः) प्रो. वैद्य बनवारी लाल गौड़ः**
पूर्व कुलपतिः
डॉ. एस. आर. राजस्थान आयुर्वेद विश्वविद्यालय, जोधपुरम्

दार्शनिकदृष्ट्या चतुर्विंशतितत्त्वात्मकं हीदं शरीरमिति संस्वीकृतं चरकसंहितायाम्, तत्तु पृथक्शः विवेचनीयम्, अत्र त्वायुः कीदृग्विधमिति तु संक्षेपेण प्रस्तूयते। लोकेऽस्मिन्नियतायुःपर्यन्तं तिष्ठतीदं शरीरम्, एतद्ध्यायुः शरीरेन्द्रियसत्त्वात्मसंयोगात्मकं भवति, कथयति महर्षिश्चरकः यत्-

**शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्।**
**नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते**॥ (च.सू.1/42)

शरीरं पञ्चमहाभूतविकारात्मकमात्मनो भोगायतनम्, इन्द्रियाणि चक्षुरादीनि, सत्त्वं मनः, आत्मा ज्ञानप्रतिसन्धाता, एषां सम्यगदृष्टयन्त्रितो योगः संयोगः। इन्द्रियाणि सत्त्वम् आत्मा च भौतिकं शरीरमाश्रित्य तिष्ठन्ति। ये त्वत्रायुषः पर्यायाः निगदितास्तैस्तु न केवलं पर्यायत्वमभिधीयतेऽपित्वायुषः वैशिष्ट्यमत्र प्रतिष्ठितमेष एव ह्याचार्यस्याभिप्रायोऽत्र निहितः, यथा हि व्याख्याकारश्चक्रपाणिः स्पष्टयति-

तस्यायुषः पर्यायानाह- धारीत्यादि। धारयति शरीरं पूतितां गन्तुं न ददातीति धारि। जीवयति प्राणान् धारयतीति जीवितम्। नित्यं शरीरस्य क्षणिकत्वेन गच्छतीति नित्यगः। अनुबध्नात्यायुरपरापरशरीरादिसंयोगरूपतयेत्यनुबन्धः। पर्यायैरायुरुच्यत इति एकार्थाभिधायिभिः शब्दैरुच्यते। (चरक.सूत्र.1/42 चक्रपाणिः)

अत्र विभिन्नैः पर्यायैः जीवितशरीरस्य वैशिष्ट्यं विशिष्टानि च लिङ्गान्यपि प्रोक्तानि, यैरिदं सुनिश्चितं क्रियते यच्छरीरे चैतन्यानुवर्तनं विद्यते न वा। जीवितस्य शरीरस्य विशिष्टानि लिङ्गानि तु विस्तरेण प्रोक्तानि चरकसंहितायाम्। अत्र तु केवलस्य चैतन्यस्य कीदृशी स्थितिः वर्तत एतदेव विवेचनीयं वर्तते।

कदाचिद्दीर्घकालीनायां मूर्च्छायां विशेषेण तु सन्न्यासावस्थायां संशयो जायते यच्छरीरे चेतनाधातोः संयोगोऽस्ति न वा, तदा तु प्रथमं हि हृदयादीनां प्राणायतनानां संस्थितिः परीक्षणीया वर्तते, पश्चाच्चेदं लक्षणं लक्षणीयं परीक्षणीयञ्च वर्तते यच्छरीरे पूतिता प्रादुर्भूता न वा, यतो हि यावच्छरीरेन्द्रियसत्त्वात्मसंयोगो वर्तते तावच्छरीरे पूतितायाः प्रारम्भ एव न भवति, एतदेव हि प्राणधारणस्य प्रमाणमायुर्वेदे प्राथमिकरूपेण सङ्केतितम्। अतः धारि जीवितञ्चैते लक्षणे प्राणधारणस्य संसूचके स्तः । एताभ्यां लक्षणाभ्यामेवायुषः नित्यगत्वम् अनुबन्धत्वमपि च सिद्ध्यति । यद्यपि च नित्यगानुबन्धशब्दाभ्यां न क्वचिदप्यायुरभिधीयते, तथाऽपि नित्यगत्वानुबन्धत्वधर्मख्यापनार्थमेवैतत्सञ्ज्ञाद्वयं बोधव्यम्।

वर्तमानकाले कोमा (Coma is a period of prolonged unconsciousness brought on by illness or injury) नाम्ना ख्याता विशिष्टा स्थितिरस्ति यस्यां पीडितः सञ्ज्ञाविहीनः चेष्टाविहीनः काष्ठीभूतो मृतोपमश्च शेते। चरकसंहितायां कथितं यत्-

**वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।**

**सन्न्यस्यन्त्यबलं जन्तुं प्राणायतनसंश्रिताः ॥**

**स ना सन्न्याससन्न्यस्तः काष्ठीभूतो मृतोपमः ।**

**प्राणैर्वियुज्यते शीघ्रम्......** (च.सू.24/43-44)

सन्न्यस्यन्तीत्यस्य "अचेष्टं कुर्वन्ति" इत्यर्थः करणीयः । अत्र प्राणायतनमिति हृदयम् । अन्यान्यपि प्राणायतनानि सन्ति, यथा हि-

**दशैवायतनान्याहुः प्राणा येषु प्रतिष्ठिताः [१]**

**शङ्खौ मर्मत्रयं कण्ठो रक्तं शुक्रौजसी गुदम्** ॥(च.सू.29/3)॥

यद्यप्येतानि दशायतनानि सन्ति किन्तु मर्मत्रये तु हृद्बस्तिशिरांस्येव परिगणितानि सन्ति, सन्न्यासे तु हृद्गतानां मलानाम् (दोषाणाम्) एव कारणत्वं विद्यत अत एव सन्न्यासे प्रोल्लिखितेन प्राणायतनम् इति पदेन हृदयस्यैव

ग्रहणङ्कुर्वन्ति चिकित्सकाः तदेव चेतनास्थानमुक्तं महर्षिणा सुश्रुतेन , यथा-

शोणितकफप्रसादजं हृदयं, यदाश्रया हि धमन्यः प्राणवहाः; तस्याधो वामतः प्लीहा फुप्फुसश्च, दक्षिणतो यकृत् क्लोम च; तद्विशेषेण चेतनास्थानम्, अतस्तस्मिंस्तमसाऽऽवृते सर्वप्राणिनः स्वपन्ति ।। (च.शा.4/31)

तद् हृदयं विशेषेण चेतनास्थानं चैतन्यास्पदं, सामान्येन तु सकलशरीरमेव चेतनास्थानम् । तदुक्तं चरके- "वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः। केशलोमनखाग्रान्तर्मलद्रवगुणैर्विना" (च.शा.१) इति । चेतनासहचरितं मनोऽपि विशेषेण हृदयाधिष्ठानं मतम् । (डल्हण)

अनेन स्पष्टीभवति यत् सन्न्यासे मृतोपमेऽपि जने शरीरेन्द्रियसत्त्वात्मसंयोगो यथावद्वर्तत एव, तस्य पुष्टिस्तु धारिस्वरूपेण जायते, यतो हि सन्न्यासे सत्यपि तच्छरीरे पूतित्वं न जायते । यद्यपि शरीरेन्द्रियसत्त्वात्मसंयोग इत्यत्र शरीरग्रहणेनैवेन्द्रियाण्यपि लभ्यन्ते, तथाऽपि प्राधान्यात्तानि पुनः पृथगुक्तानि| अयं च संयोगः संयोगिनः शरीरस्य क्षणिकत्वेन यद्यपि क्षणिकस्तथाऽपि सन्तानव्यवस्थितोऽयमेकतयोच्यते| इह तु शङ्का जायते यदत्र शरीरेन्द्रियसत्त्वात्मसंयोग इति किमर्थमुक्तम्? अस्योत्तरमस्ति यत्-

शरीरेन्द्रियसत्त्वात्मसंयोगजन्या चैतन्यानुवृत्तिर्यथोक्तसंयोगाव्यभिचारित्वेन व्यक्तत्वेन लक्षणत्वेनोक्ताऽऽयुर्वेदशास्त्रे । शरीरादिसंयोगरूपमेव त्वायुः परमार्थतः; एवम्भूतसंयोगाभावे मरणमायुरुपरमरूपं भवति, मृतशरीरे तु चेतसोऽभावादायूरूपसंयोगाभावः। सन्न्यासे तु आयुषः संस्थितिः वर्तत एव ।

**शरीरेन्द्रियसत्त्वात्मसंयोगेऽस्मिन्नात्मा तु निर्विकारत्वेन तिष्ठति, यथा-**

**निर्विकारः परस्त्वात्मा सत्त्वभूतगुणेन्द्रियैः।**

**चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः।।**(च.सू.1/56)

द्रष्टा साक्षी; तेन यतिर्यथा परमशान्तः साक्षी सञ्जगतः क्रियाः सर्वाः पश्यन्न रागद्वेषादिना युज्यते, तथाऽऽत्माऽपि सुखदुःखाद्युपलभमानोऽपि न रागादिना युज्यते; दृश्यमानरागादिविकारस्तु मनसि, प्राकृतबुद्धौ वा साङ्ख्यदर्शनपरिग्रहाद्भवतीति भावः| साङ्ख्यमते च मनःशब्देन बुद्धिरन्तःकरणं च गृह्यते (मनः, बुद्धिः, अहङ्कारः एते त्रयः अन्तःकरणम् इति सञ्ज्ञया व्यवह्रियते) ।

तदनन्तरन्तु वियोगो भवतीत्येषां चतुर्ण्णाम्। एष एवोपरमो विनाशो मृत्युर्वेति ज्ञायते विभिन्नैः सम्बोधनैः। स उपरमो मृत्युर्वा द्विविधः- कालमृत्युः अकालमृत्युश्च।

आयुः शरीरोपगतं बलवत्प्रकृत्या यथावदुपचर्यमाणं स्वप्रमाणक्षयादेवावसानं गच्छति; स मृत्युः काले। किन्तु यथा हि कस्यचिदपि वाहनस्याक्षोऽतिभाराधिष्ठितत्वाद्विषमपथादपथादक्षचक्रभङ्गाद्वाह्यवाहक-दोषादणिमोक्षादनुपाङ्गादितस्ततः प्रक्षेपणाच्चान्तराऽवसानमापद्यते, तथाऽऽयुरप्ययथाबलमारम्भादय-थाग्न्यभ्यवहरणाद्विषमाभ्यावहरणाद्विषमशरीरन्यासादतिमैथुनादसत्संश्रयादुदीर्णवेगविनिग्रहाद्विधार्यवेगाविधार णाद्भूतविषवाय्वग्न्युपतापादभिघाताद्दुर्घटनाविशेषादाहारप्रतीकारविवर्जनाच्चान्तराऽवसानमापद्यते, स मृत्युरकाले; तथा ज्वरादीनप्यातङ्कान्मिथ्योपचरितानकालमृत्यून् पश्यामः जनपदोद्ध्वंसकाले (महामारीकाले) तु विशेषेण इति, यथा हि विगतकालेऽस्माभिः दृष्टं "कोरोना" इति नामकेन भयङ्करेणातङ्कात्मकेन रोगेण।

अनेन विवरणेन स्पष्टञ्जायते यच्चरकसंहितायां विशिष्टा दार्शनिकस्वरूपिणी दृष्टिः वर्तते यस्मिन् षड्धात्वात्मकस्य चतुर्विंशतितत्त्वात्मकस्य च पुरुषस्य संस्थितिं स्वीकृत्यापि शरीरेन्द्रियसत्त्वात्मसंयोगस्यैव वैशिष्ट्यं प्रतिपादितम्। चरकसंहितायां साङ्ख्य-न्यायवैशैषिकादिदर्शनानामनुसरणङ्कृत्वाऽप्याचार्येण यत्र कुत्रापि परिवर्तनङ्कृत्वा विशिष्टं स्वरूपं प्रदर्शितम्, अत एव चरकीयदर्शनस्य वैशिष्ट्यमवलोक्यते तज्ज्ञैः, यथा च शरीरेन्द्रियसत्त्वात्मसंयोगे वैशिष्ट्यं प्रदर्शितमाचार्येण।